National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(60): 184-186
© 2025 NJHSR
www.sanskritarticle.com

**सौपीक्सुमनपरिडा**
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**सौपीक्सुमनपरिडा**
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# श्रीमद्भद्रेशस्वामिनः प्रस्थानत्रयीभाष्यस्यैका परिचितिः

**सौपीक्सुमनपरिडा**

**शोधसारः**

अक्षरपुरुषोत्तमदर्शनप्रतिपादकभाष्यकर्तृत्वेन स्वामिनारायणदेवस्योपास्यत्वेन ब्रह्मसूत्रमुपनिषद्भगवद्गीताख्यप्रस्थानत्रयाणां भाष्यकर्तृत्वेन संस्कृतसाहित्याकाशे भद्रेशस्वामी सुपरिचितो वर्तते। अनेन प्रसन्नगम्भीरस्वामिनारायणपरकमत्यन्तं प्रौढं शाश्वतं भावगाम्भीर्यं भाष्यं रचितम्। भाष्यकार-भद्रेशस्वामिनः परिचयमादाय अत्र प्रवर्तयितव्यस्याध्यायस्य प्रसक्तिः भाष्यस्याध्ययनाद् शास्त्रान्तरेषु वा प्राप्तस्य अर्थस्याधारेण वर्ण्यते। अत्र भद्रेशस्वामिना अक्षरधाम्नि विद्यमानस्वामिनारायणे सर्वसिद्धान्तानां पर्यवेसितार्थं स्पष्टीकर्तुं बहुधा अत्र अक्षरपुरुषोत्तमप्रतिपादकसिद्धान्तः स्वीयभाष्ये अनेन स्पष्टीकृतो वर्तते।

**पारिभाषिकशब्दाः** प्रस्थानत्रयी, ब्रह्मसूत्रम्, भगवद्गीता, उपनिषद्

वेदान्तस्य प्रसक्तिः अज्ञाननिवारणपुरस्सरं ब्रह्मविद्याप्राप्तिः जन्मकर्मबन्धनात् मुक्तिः इति सुतरां श्लाघ्यते। अविद्यायाः सम्पूर्णविनाशानन्तरं ब्रह्मज्ञानप्राप्तिर्भवति। अतः एतादृशं ब्रह्मप्राप्तिनिमित्तं वेदान्तशास्त्रमुपनिषत्प्रमाणाधारेण बहुधा शास्त्रैकपक्षे अविद्यायाः विनाशं पुरस्सरं ज्ञानस्यावधारणा स्पष्टीकरोति। उच्यते ईशावास्योपनिषदि यत् -

**अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।**
**ततो भूय इव ते तमो ये अविद्यायां रताः॥**[1]

ब्रह्मसूत्रभगवद्गीतोपनिषदां प्रस्थानत्रयी अन्तर्भावत्वात् एतावता प्रस्थानत्रयीमादाय नैकभाष्यकाराः स्वीयशास्त्रीयसिद्धान्तान् प्रतिपादितवन्तः। शारीरिकभाष्यं श्रीभाष्यं पूर्णप्रज्ञभाष्यमित्यादिनैकं भाष्यं वेदान्तप्रमाणत्वेन बहुधा कथ्यते। अतः अर्वाचीनभाष्यकारैः स्वामिदयान्दारविन्दप्रभृतिभिः भाष्यकारैः सुतरां भाष्यस्य प्रसक्तिः स्वीयाभिनवचिन्तनमादाय बहुधा व्यक्तीकृता वर्तते। तद्वत् भद्रेशस्वामिना स्वामिनारायणपरकं सर्वतन्त्रस्वतन्त्रभाष्यं बहुधा रचितं यस्य च प्रसक्तिः अक्षरधाम्नि विद्यमानपुरुषोत्तमस्वामिनारायणे पर्यवेसितार्थो द्योतते। अतः अस्य प्रसक्तिः अधः उपस्थाप्यते।

**श्रीमद्भद्रेशस्वामिपादानां देशकालकृतयः**

श्रीमद्भद्रेशस्वामिपादैस्तावत् भारतवर्षे जनिमलभदिति महानयं गौरवस्यावसरः। एतादृशानां पूज्यानां जन्म केवलं भारतवर्षे एव भवितुं शक्नोति। यतो वेदवेदान्तदर्शनानां मूलं रहस्यमत्रैव समजनि। शास्त्रीयसिद्धान्ताः अत्रैव बहुधा श्लाघ्यन्ते प्रशस्यन्ते काम्यन्ते च। अतः इदं स्पष्टीयते यत् यानि भाष्यानि पाश्चात्यैः ब्रह्मसूत्रोपनिषद्भगवद्गीतामादाय एतावता अजायन्त तानि सर्वाणि इतः प्राच्यज्ञानस्रोतसि एव अभूवन्।

श्रीमद्भद्रेशस्वामिपादाः महाराष्ट्रप्रदेशस्थनानदेडग्रामे मार्गशीर्ष-मासस्य शुक्लपक्ष-तृतीयायां लब्धजनिः अनेकशास्त्रसिद्धान्तानां समन्वितस्वरूपं प्रत्यपीपदन्। असौ गुरुवासरे १२-१२-१९६६ तमे वर्षे भारतवर्षे २०५३ विक्रमाब्दे जनिमलभत्। जन्मनादारभ्य अलौकिकी प्रतिभा अस्य लोकमुखेषु समायाता जाता।

गुरोः सान्निध्यं लब्ध्वा असौ महानुभवो नैकशास्त्रसिद्धान्तानां परिसेवने अध्ययनकर्मणि च बहुधा मनोनिवेशः कृतो वर्तते।

**प्रस्थानत्रयीभाष्यम्**

श्रीमद्भद्रेशस्वामिपादैर्विरचितप्रस्थानत्रयीभाष्यं वेदान्तपरकतया बहुधा श्लाघ्यते। अस्य भाष्यस्य प्रासङ्गिकता समाजे बहुधा श्रूयते। अतः अस्य भाष्यस्य सान्निध्यं बहुभिः दार्शनिकैस्तावत् समालोच्यते समीक्ष्यते च। अस्य वेदान्तपरकतया शङ्कराचार्यवत् प्रशस्तिः प्राप्यते। विशेषरूपेण अन्येषां ग्रन्थानां रचनां कृत्वा अन्तिमे प्रस्थानत्रयीभाष्यं कर्तुं प्रयतते। तत्र प्रस्थानत्रयीभाष्यप्रसङ्गे अस्य साहित्यिकमूल्यबोधः अपि बहुधा प्राप्यते। अतः अस्य प्रस्थानत्रयीभाष्यस्य साहित्यशास्त्रे अपि आदरः लक्ष्यते। अनेन प्रणीतं भाष्यमेतावता देहल्यां स्वामिनारायणमन्दिरे प्राप्यते। स्वामिनारायणपरकमिदं भाष्यं भाष्यसाहित्ये बहुधा स्थानं दृढीकरोति। अतः अस्य भाष्यस्य सुतरां चर्चा शास्त्रान्तरेषु लक्ष्यते।

**ईशाद्युपनिषद्भाष्यं ब्रह्मविद्याप्रकाशकम्।**
**कुर्वे भद्रेशदासोऽहं स्वामिनारायणाभिधम्॥**
**स्वामिनारायणेनेह सिद्धान्तो यः प्रकाशितः।**
**तस्यैव सर्वथा सम्यग् इहानुसरणं यतः॥**[2]

परमाराध्यस्वामिपादानां प्रस्थानत्रयीभाष्यं सर्वप्रसिद्धं सर्वश्रेष्ठभाष्यत्वेन शास्त्रेषु बहुधा प्रसज्यते। अतः अस्य वैशिष्ट्यं बहुधा बिभाति। प्रस्थानत्रयीभाष्ये एव स्वामिपादानां बहुकालः यापितो वर्तते। भाष्यस्य प्रसक्तौ स्वयमेव उक्तं तेन

**याभ्यां सर्वमिदं सृष्टं व्याप्तं प्रशासितं धृतम्।**
**वन्दे तौ सुधियै साक्षादक्षरपुरुषोत्तमौ॥**[3]

उपनिषदामुपरि प्रशस्तं प्राञ्जलं भावगाम्भीर्यभाष्यं श्रीमद्भद्रेशस्वामिपादैस्तु ब्रह्मविद्यायाः अक्षरपुरुषोत्तमदर्शनप्रतिपादकविद्यायाः साधनार्थं स्वामिनारायणे सकलानां जीवानां जन्मस्थितिभङ्गादीनां मूलकारणत्वमभिनिविष्टम्। ब्रह्मपरंब्रह्मपरकचिन्तनं मायायाः सार्वभौमिकता अज्ञानस्य प्राचुर्य्यता इत्यते सर्वेऽपि वास्तविकज्ञानस्यावरोधे सदैव प्रयतन्ते। अतः एतस्माद् विमुक्तो जन्तुः जन्मादिदुःखैर्भूयो भूयो न प्रपीडितो भूत्वा परमधाम्नि तिष्ठति।

महर्षिबादरायणेन प्रणीतब्रह्मसूत्रं ब्रह्मतत्त्वप्रतिपादकं वेदान्तशास्त्रस्य प्रतिनिधित्वं कृत्वा तत्र ब्रह्मणो जगत्कर्तृत्वं जराजन्मादिबन्धनगतसकलरहस्यानां समन्वयं कृत्वा चतुर्षु अध्यायेषु आध्यात्मिकाधिभौतिकाधिदैविकस्वरूपाणि प्रतिपादितानि सन्ति। ब्रह्मसूत्रे चत्वारः अध्यायाः १९५ अधिकरणानि च विद्यन्ते। समन्वयाध्याया विरोधाध्यायसाधनाध्यायफला-ध्यायश्चेति। अत्र सर्वेषामध्यायानां व्याख्यानं स्वामिनारायणभाष्ये प्राप्यते।

भद्रेशस्वामिना स्वामिनारायणभाष्ये समेषामध्यायानां स्वामिनारायाणात्मकभाष्यं तत्परकं व्याख्यानं यथा शाङ्करेणाद्वैतपरकत्वे शारीरिकभाष्येति पदेन व्यवहारः कृतो वर्तते तद्वदत्रापि तादृशं स्वामिनारायणपरकव्याख्यानं विहितम्। एवं ब्रह्मसूत्रस्य परम्परानुसारं नैकभाष्यकारैस्तु नैकं शास्त्रीयचिन्तनमुपस्कृत्य अभिनवचिन्तनमादाय शास्त्रीयविधिः पुरस्सरं तद्गतानि तत्त्वानि सुतरां प्रतिपादितानि सन्ति।

उच्यते अद्वैतसिद्धौ मधुसूदनसरस्वतीपादैर्नित्यनिर्विकल्पनिर्गुणसच्चिदानन्दस्वरूपयुक्तस्य शाश्वतब्रह्मणो जगत्कर्तृत्वं जन्मस्थितिभङ्गस्य निमित्तोपादानकारणञ्च प्रतिपाद्य तत्र कर्मबन्धनान्मुक्तिप्राप्तये आत्मा ब्रह्मेति विज्ञाय श्रुतिस्मृतिप्रमाणगतविषयैः शास्त्रीयानुचिन्तनं पुरस्सरं ब्रह्मपरकाभिधानं व्यज्यते। तदुच्यते

**"आत्मा ब्रह्मेत्यधीतः श्रुतिशिखरशतैर्निर्विशेषश्च सर्वैः**
**किं तत्र स्वप्रकाशे गुणलवरहिते वस्तु शास्त्रेण चिन्त्यम्।**
**तच्चेद्बुद्ध्यते नित्यस्फुरदगुणलवप्रत्यगात्मैदमर्थ्ये**
**तन्निर्वाहाय तेषां सगुणविषयता पूर्वपक्षेऽपि ते स्यात्॥"**[4]

अत्रायमाशयो भजते यदयमात्मा ब्रह्मेति समधीगत्य ऐश्वरीयसत्तात्मकः आत्मा वर्तते इति ज्ञात्वा तत्प्रतिपादकब्रह्मसूत्रं श्रुत्यादिनैकप्रमाणैस्तन्निर्वाहकत्वेन सगुणनिर्गुणब्रह्मणि प्रसक्तपर्यवसानञ्च विदधातुं विविधैः शास्त्रप्रमाणैः स्वीयमतं सुतरां नैकैर्भाष्यकारैः प्रतिपादितम्। एतत्तु केवलं गुरोः सकाशाद् नैकस्तर्कपूर्णैर्वचोभिः केवलं ब्रह्मतत्त्वं तत्तदीश्वरे पर्यवसानस्य भावना शास्त्रोक्तचिन्तनं च दर्शितम्। अतो ब्रह्मसूत्रमादाय नैकैर्भाष्यकारैः स्वीयादर्शचिन्तनानि नैकप्रमाणपुरस्सरं शास्त्रोक्तविधिना तर्कपूर्णरीत्या ब्रह्मतत्त्वं ब्रह्मविद्या-परकञ्च प्रतिपादितम्।

गीतायाः प्रस्थानत्रयाणामन्तर्भावत्वाद् वेदान्तत्वेन पर्यवसितार्थस्य द्योतने तद्गतानि रहस्यानि बहुधा काङ्क्ष्यन्ते। ब्रह्मपरंब्रह्मवाचकैस्तत्त्वैस्तु आध्यात्मिकतायाः विचारः क्रियते। अत्र विबुधानां निर्मलां बुद्धिं भद्रां विधातुं कल्याणप्रदां च विदधातुं ब्रह्मपरंब्रह्मपरकचिन्तनञ्च कर्मक्षयनिमित्तं समासादयितुं श्रीमद्भगवद्गीताख्ययोगशास्त्रस्य भाष्यं प्रतिपाद्यते। उच्यते

**वेदान्तैः सकलैः सदा सुसहजमुद्घोषप्रज्ञापिते।**
**मायास्पर्शनशून्यदिव्यतनुनी प्रत्यक्षतो लम्भिते॥**
**ते ब्रह्मपरब्रह्मणी प्रकुरुतां कारुण्यप्रेक्षाशिषा,**
**गीतावाक्यविचारतत्त्वधरणे भद्रां धियं निर्मलाम्॥**[5]

**भाष्यारम्भकालः**

ब्रह्मसूत्रमुपनिषद्भगवद्गीतानां मूल्यबोधभित्तिकं स्वामिनारायणपरकमक्षरपुरुषोत्तमपरकं श्रेष्ठभाष्यमनेन रचितम्। भाष्ये स्वामिनारायणस्याराध्यत्वं जगतः जन्मस्थितिभङ्गस्य मूलकारणत्वेन जगत्कारणत्वेन उभयमुपादाननिमित्तकारणत्वेनास्य प्रसक्ततां स्पष्टीकर्त्तुं बहुधा शब्दार्थसम्बद्धनैकशास्त्राणां रचना कृता वर्तते। श्रीमद्भद्रेशस्वामिना तावद्गुरुप्रमुखानां स्वामि-पादानामनुमतिं स्वीकृत्य तत्र सारङ्गपुरे एकस्मिन् गृहे उपविश्य भाष्यं रचितमिति प्रशस्तिः प्राप्यते। अतः सारङ्गपुरस्थानां सतां विदुषामपि अस्य कृते बहु प्रेरणा आसीदिति कथ्यते। तत्रत्यानां जनानां प्रवृत्तिः एतेषां स्वामिपादानामुपरि गभीरविश्वासः स्वामिपादानां भाष्यरचना-निमित्तं प्रेरणायाः सर्वप्रथमम् उत्प्रेरकत्वेन श्लाघ्यते।

प्रतिदिनमनेन विंशतिहोरात्मककालो भाष्यरचनायामतिवाहितो कृतः। तत्र तत्र केवलं भोजननित्यकर्माणि च समाप्य अन्यच्च कालांशः भाष्याय एव प्रदत्तो विद्यते।

स्वगुरुभिः सह प्राप्ते समये एतेषां विचाराणां शास्त्रीयसिद्धान्तानां चर्चा परिचर्चा माध्यमेन प्रश्नान् सम्यग् आलोच्य शास्त्रीय-विधिपुरस्सरं पुनः भाष्यं प्रणेतुं प्रयतते। अस्य भाष्यं बहु सरलं भावगाम्भीर्यतां वितनोति।

यद्यपि शङ्कराचार्यैः यद् भाष्यं प्रणीतं तस्य प्रसक्तिः एतस्माद् बहु विन्दति तथापि आध्यात्मिकभावप्रपूरितभाष्यमिदं श्रेष्ठतां सुतरां वितनोति। अस्य भाष्यस्य नैकशास्त्रसिद्धान्तो न्यायव्याकरणा-दिशैलीगतसौन्दर्यं शब्दार्थभावगतप्रशस्तिस्तु सुतरां पाठकानां मनसि स्वामिनारायणं प्रति अहैतुकीं प्रीर्तिं वितनोति। तदर्थमस्य भाष्यस्य सौन्दर्यदिशा अध्ययनं कृतम्। अत्र यथा विषयाणां गाम्भीर्यता वर्तते तद्वत् अत्रापि शास्त्रीयसिद्धान्ताः अपि बहुधा श्लाघ्यन्ते।

एवं रूपेण अस्य भाष्यस्य प्रसक्तिः स्वामिनारायणपरकं च बहुधा आम्नातम्।

**भाष्ये विघ्नाः**

उत्तमकर्मणां सम्पादने नैकविघ्नाः सदैव सुतरां समायान्ति। प्रारम्भे यत्र विघ्नाः न प्राप्यन्ते तत्कार्यं कदाचिदपि साफल्यं न विन्दति। अतः विघ्नेनापि समभ्यर्चितकर्मणां श्रेष्ठत्वं विन्दति। अत्र भाष्यरचना-वेलायां यस्मिन् गृहे भाष्यं रचयितुं प्रवृत्तः स्वामिभद्रेशस्वामिपादः तत्र कदाचित् जलपरिपूर्णमभवत्। तत्र प्राचीनशास्त्राणि तत्र विनष्टतां गतानि। अतः तस्मादपि भाष्यं प्रणेतुमनेन नैकविधमार्गाः समाचरिताः सन्ति।

**भाष्यग्रन्थानां समाप्तितिथिः**

श्रीमद्भद्रेशस्वामिपादैस्तु शान्तचेतसां नैकग्रन्थानां भाष्यानि कृतानि प्राप्यन्ते। तेषु प्रसिद्धत्वेन प्रस्थानत्रयीभाष्यं सुतरां श्लाघ्यन्ते। यथा –

**ब्रह्मसूत्रस्वामिनारायणभाष्यम्**
**उपनिषदां स्वामिनारायणभाष्यम्**
**श्रीमद्भगवद्गीतायाः स्वामिनारायणभाष्यम्**

यथा भाष्यस्यारम्भः उत्तमतिथौ बभूव तद्वत् समाप्तिरपि उत्तमतिथौ अभवत्।

स्वामिनारायणस्य सान्निध्ययोगात् भाष्यमिदं समार्तिं गतः इति अत्र बहुधा भद्रेशस्वामिना उक्तम्। यथोच्यते -

**तस्माद्धि संज्ञितं भाष्यं स्वामिनारायणाख्यया।**
**प्रसीदतु सदा साक्षात्स्वामिनारायणो हरिः॥**[6]

ईशकेनाद्यष्टोपनिषदां भाष्यस्य समाप्तिस्तु ज्येष्ठशुक्लद्वितीयायां तिथौ सोमवासरे सं. २०६२ तमे संवत्सरे २९-०५-२००६ तमे वर्षे अभवत्।

छान्दोग्योपनिषत्स्वामिनारायणभाष्यस्य समाप्तिस्तावत् कार्त्तिक-शुक्लद्वितीयायां तिथौ सं. २०६२ तमे संवत्सरे १५-१०-२००६ तमे वर्षे अभवत्।

बृहदारण्यकोपनिषत्स्वामिनारायणभाष्यस्य समाप्तिस्तु मार्गशीर्ष-कृष्णत्रयोदश्यां तिथौ सं. २०६२ तमे संवत्सरे १८-१२-२००६ तमे वर्षे अभूत्।

ब्रह्मसूत्रस्य स्वामिनारायणभाष्यस्य समाप्तिस्तावद् आश्विनशुक्ल-दशम्यां तिथौ सं. २०६२ तमे संवत्सरे रविवासरे २१-१०-२००६ तमे वर्षे अभवत्।

श्रीमद्भगवद्गीतायाः स्वामिनारायणभाष्यस्य समाप्तिस्तावत् कार्त्तिक-कृष्णचतुर्थी तिथौ सं. २०६२ तमे संवत्सरे रविवासरे १८-११-२००६ तमे वर्षे अभवत्।

**उपसंहारः**

इत्थं प्रकारेण नैकसाधनपुरस्सरं प्रस्थानत्रयीभाष्यं भद्रेशस्वामिना स्वामिनारायणे अक्षरपुरुषोत्तमदर्शनसिद्धान्तप्रतिपादकत्वेन बहुधा व्यक्तीकृतम्। अत्र ब्रह्मसूत्रे भगवद्गीतायाम् उपनिषद्भाष्ये च अस्य प्रसक्तिस्तावत् सम्प्रतिककाले बहुधा श्रूयते। अत्र केवलं ब्रह्मतत्त्वं मोक्षमार्गः ईश्वरस्यैक्यं सम्पादनं स्पष्टीकृतम्। सर्वासामुपनिषदा-माराध्यविषयस्त्वेनापि जगतः मूलकारणत्वं स्वामिनारायणत्वेन प्रसक्तिः श्लाघ्यते।

**सहायकग्रन्थसूची**

१.ईशाद्यष्टोपनिषत् स्वामिनारायणभाष्यम्, महामहोपाध्यायः साधुभद्रेशदासस्वामी, स्वामिनारायण अक्षरपीठ, शाहीबाग, अमदावाद, ३८० ००४

२.श्रीमद्भगवद्गीता स्वामिनारायणभाष्यम्, महामहोपाध्यायः साधुभद्रेशदासस्वामी, स्वामिनारायण अक्षरपीठ, शाहीबाग, अमदावाद, ३८० ००४

३.ब्रह्मसूत्रम्, स्वामिनारायणभाष्यम्, महामहोपाध्यायः साधुभद्रेश-दासस्वामी, स्वामिनारायण अक्षरपीठ, शाहीबाग, अमदावाद, ३८० ००४

४.बृहदारण्यकोपनिषद्, स्वामिनारायणभाष्यम्, महामहोपाध्यायः साधुभद्रेशदासस्वामी, स्वामिनारायण अक्षरपीठ, शाहीबाग, अमदावाद, ३८० ००४

५.छान्दोग्योपनिषद्, स्वामिनारायणभाष्यम्, महामहोपाध्यायः साधुभद्रेशदासस्वामी, स्वामिनारायण अक्षरपीठ, शाहीबाग, अमदावाद, ३८० ००४

**सन्दर्भः**

[1] बृ. उ. ४.४.१०

[2] उप. भा. (भ. स्वा.भा) श्लो. ९-१०

[3] ईशा. उप. उपोद्घाते (भ. स्वा.भा) श्लो. १

[4] अद्वै. सि. पृ. जन्माद्यधिकरणम् ६

[5] भ. गी. भा. (स्वा. ना. भा) श्लो. ४

[6] उप. भा. (भ. स्वा.भा) श्लो. ११